UNIVERSAL LIBRARY
OU_184103
UNIVERSAL LIBRARY

OUP—902—26-3-70—5,000
184103
OSMANIA UNIVERSITY LIBRARY
Call No. S81 / A64D
Accession No. P. G. S2147
Author अप्पय्यामात्य
Title दशकुमारचरितसारः 1949.
This book should be returned on or before the date last marked below.

# PREFACE

THE *Daśakumāracarita* of Daṇḍin is one of the most important prose-works in Sanskrit, and it ranks along with the *Kādambarī* and the *Harṣacarita* of Bāṇa; it occupies a decidedly higher position than the *Vāsavadattā* of Subandhu. The plot is very complicated; and in the case of a large number of texts with a complicated plot there have been easy narrations of the theme, as in the case of the *Kādambarī* and the *Mālatīmādhava*. Narrations of the story of the *Mudrārākṣasa*, sometimes with the story leading to the theme of the Drama and sometimes only of the preceding story, are also known. The present work is one of the few attempts to give an easy narration of the story of the *Daśakumāracarita*. It is in three parts, and contains the story of the *Pūrvapīṭhikā* in five parts. The second, third and fourth parts of the *Pūrvapīṭhikā* are included in the second part of the present book, and the first and fifth parts of the original are included respectively in the first and third parts of this work. In the condensation and simple narration one can notice even a sort of verbal fidelity to the original. The language is very simple and lucid, and the narration is done in easy *Anuṣṭup* verses, with a verse in a longer metre at the end of each of the three parts.

There is much uncertainty about the *Daśakumāracarita*, whether the *Pūrvapīṭhikā* and the main part of the text are by the same author and if that

author is Daṇḍin himself, and what the relation of the text is to the *Avantisundarīkathā*. But one thing is certain, and that is that a text like the available *Daśa-kumāracarita* was very popular in ancient times and that it contained a main text-portion and a *Pūrva-pīṭhikā*. Some scholars have even detected discrepancies between the *Pūrvapīṭhikā* and the main text-portion of the available work. Apart from the very interesting story, the work is very important in understanding the life of India in medieval times as depicted by it. Certain aspects of life described in the *Daśakumāracarita* cannot be met with in other works in Sanskrit literature. I may boldly assert that the *Daśakumāracarita* holds the same position among the Kāvyas in Sanskrit literature which the *Mṛcchakaṭika* holds among the Sanskrit Dramas.

Much is lost in the simple narration and in the condensation of the theme, and this is quite natural. But the condensation helps the student through the complications of the plot, and is thus a real aid in understanding the text of the *Daśakumāracarita*. It is not to replace the original text, to say nothing of superceding it; its value is only as a preparation for reading the *Daśakumāracarita*. Little is known of the author. We do not know either if the narration continues for the rest of the text. The editor has given a very readable text which, I am sure, will be appreciated by scholars.

*Adyar Library* — C. KUNHAN RAJA
April 10, 1949

# INTRODUCTION

On the very popular *Daśakumāracarita* of Daṇḍin, on the prose-work of the poet "famous above all other Indian bards for the sweetness of his language,"[1] *five* epitomes at least, ancient and modern, are known. The *Daśakumāracaritasaṅgraha*[2] of the late R. V. Krishnamacharya is perhaps the latest of these; among the earlier attempts come another work of the same name, though it is anonymous, the *Daśakumārakathā* of Gopīnātha Mahārājādhirāja, the *Daśakumāracaritapūrvapīṭhikā* of Vināyaka, and the *Daśakumārakathāsāra* of Appayāmātya.

Of the first of these early abridgments nothing more is known except that it is believed to exist in one of the private Libraries in the South listed by Oppert.[3] Of each of the next two works, a MS. (Eggeling 4070, 4067) is available in the Commonwealth Relations Office Library, London. Gopīnātha's attempt appears to be a bold, though not important or interesting, attempt at ameliorating (*saṁśodhana*) the original text;[4] while Vināyaka compresses the original story in prose "in about two hundred couplets collected into three sections."[5] Appayāmātya's work goes, more or less, on the same lines; but it has the distinction of

[1] H. T. Colebrooke, *Introductory Remarks* to *Hitopadeśa* (Serampore, 1804), p. xii.
[2] Printed in Srirangam
[3] II. 3165.
[4] John Taylor on Eggeling 4070.
[5] Colebrooke, *op. cit*, p. xiii.

being composed in "easy, correct and smooth language," a distinction which, above all others, made Colebrooke print it as an Appendix to the First Edition of the *Hitopadeśa* (Serampore, 1804). The MS. used in this edition was most likely that preserved now in the Commonwealth Relations Office Library,[1] London, under the number 1764 a (Eggeling 4068).[2]

Not to speak of the fact that, by virtue of merit, the poem deserves a much better status than is given to it as an "Appendix" to another work, it has to be admitted that the claims of the Serampore edition of our poem to be called an "edition" at all are in the highest degree questionable. All kinds of mistakes put together there are, on an average, four to five errors on each page of this *first* edition of the extremely interesting epitome of Appayāmātya. Teeming in misprints and impossible readings, omitting,[3] as it does, whole verses or parts of verses, or jumbling frequently[4] several lines or portions of them, this printed version of our poem is extremely unreadable. It has not the merit even of a single good MS., not even the value of the corrupt MS. which is its basis and which, at least, may have some calligraphic interest.

Of even this edition very few Libraries now are known to contain a copy. No apology is, therefore, necessary in bringing out this new edition of the poem which, in many places, is bound to be an improvement on its predecessor. Moreover, unlike the old editor, I have now the benefit of the use of the fairly old

[1] This is the old India Office Library.
[2] Colebrooke on Eggeling 4068
[3] See, for instance, II, 37, III 4; II 6 b.
[4] See, for instance, II 4 and 5

paper MS. of the poem preserved in the Adyar Library under the shelf-number XL. B. 62 and described by me in my Descriptive Catalogue of the *Kāvya*, *Nāṭaka* and *Alaṅkāra* MSS. in the Library under the number 524. True, this MS. is nearly as corrupt as the London MS. on which probably the old Serampore edition was based and, in reconstructing the text, I have been compelled, as a rule, to depend on my own judgment. But it has to be acknowledged that, very often, this MS. (A) gives very good readings quite preferable to those given in the Serampore Edition (S). This will be clear from the notes at the bottom of each page.

In A, the colophons of the first two chapters run: *Iti daśakumārakathāsāre . . . paricchedaḥ*. Even the final colophon here is content with the addition of the adjective *śrīmadappayāmātyaviracite*. But the colophons of S make it a point also to speak of the subject-matter of the chapter they conclude, and are thus fuller. They usually run: *Iti śrīmadappayāmātyaviracite daśakumārakathāsāre. . . nāma . . . paricchedaḥ*. It is these colophons that I adopt in the present edition. The work has been called *Daśakumāracaritakathāsāra* only in the *first* colophon of S. As the name is explanatory of the nature of the work I retain it in *Pariccheda I*, but, as it is rather cumbrous, I do not adopt it also for the other chapters.

In both A and S the author is called *Appayamantrin* in the introductory verse and *Appayāmātya* in the colophons. In the title-page I prefer the colophonic version. As for more details about the author, I must confess that I am as much in the dark as was Cole-

brooke[1] nearly a century and a half ago. But I may venture the suggestion that he is more likely a minister of the old Vijayanagara Kingdom rather than the reputed Advaitic writer of that name as many would have us believe.[2]

Concerning the content of the poem, it has already been indicated above that it is an abridgment of the popular prose romance of Daṇḍin. Since the story is well-known, I need not attempt to recount it here. It is necessary, however, to mention that the present work is interested only in the first part of the *Daśakumāracarita*, called the *pūrvapīṭhikā*, that the original *five* sections are now pressed into *three*, and that the story ends with the marriage of Rājavāhana, the "principal hero" in the poem.

There now remains for me the pleasant duty of acknowledging the help I received in bringing out this small book. First, I must thank the Director of the Adyar Library for having borrowed, for my use, the *first* edition of this poem from the National Library,[3] Calcutta, and the Editor of the *Adyar Library Bulletin* for having provided me with the necessary space in the Journal. Next, I must express my indebtedness to Pandit V. Krishnamacharya and Mr. K. Ramachandra Sarma who have assisted me both in the choice of readings and in the revision of the proofs.

*Adyar Library* H. G. NARAHARI
March 30, 1949

[1] *loc. cit.*
[2] See, for instance, *Kāvyamālā*, Guccha I, p 91; Aufrecht, CC, I 22b, 247 a; M Krishnamachari (*Classical Sanskrit Literature*, p. 464) is certain on the point, though he does not say how.
[3] This is what was, till recently, the Imperial Library.

# दशकुमारकथासारः

## अप्पयामात्यकृतः

## प्रथमः परिच्छेदः

श्रीगणेशाय नमः ॥

श्रीवागुमां परां शान्तामेकवीरां महेश्वरीम् ।
संपत्साहित्यसौभाग्यसम्यक् सिद्ध्यर्थमर्थये ॥ १ ॥
श्रीगणेश्वरमाराध्य श्रीमदप्पयमन्त्रिणा ।
दशानां च कुमाराणां कथासारो विरच्यते ॥ २ ॥
अस्ति पुष्पपुरं नाम मगधेषु महत्पुरम् ।
राजहंसाह्वयो राजा तच्छशासारिशासनः ॥ ३ ॥
देवी वसुमती नाम बभूवास्य मनःप्रिया ।
बभौ वसुमतीवालं या रत्नाकरमेखला ॥ ४ ॥
धृतिमान्मतिशर्मा च धर्मपालश्च धार्मिकः ।
श्रीमान्पद्मोद्भवश्चैते तस्यासन्सचिवास्त्रयः ॥ ५ ॥
सुमतिः सत्यशर्मा च तनयौ मतिशर्मणः ।
सुमित्रः कामपालश्च धर्मपालस्य नन्दनौ ॥ ६ ॥
सुमन्त्रसुश्रुतौ ख्यातौ श्रेष्ठो रत्नोद्भवोऽपि च ।

पद्मोद्भवस्याप्येते[1] तु समभूवन्सुतास्त्रयः ॥ ७ ॥
सत्यशर्मा विरक्तः सन् तीर्थस्थानान्यसेवत ।
कामपालश्चचार क्ष्मामुल्लङ्घ्य वचनं गुरोः ॥ ८ ॥
स च रत्नोद्भवो नौभिः वसुरत्नजिघृक्षया[2] ।
रत्नाकरं विवेशोर्व्याः पतिं शेषाः सिषेविरे ॥ ९ ॥
कदाचिदर्पयामास स्वप्ने देव्यै द्विजः फलम् ।
तद्वाक्यं द्रढयामास पुत्रलाभं स भूपतिः ॥ १० ॥
केशवानुगृहीतेन तेन स्वप्नफलेन च ।
गर्भं दिनेषु गच्छत्सु देवी वसुमती दधौ ॥ ११ ॥
अत्रान्तरे मालवेशो मानसारः पराजितः ।
शक्तिं लब्ध्वा महाकालात् पुनर्युद्धाय निर्ययौ ॥ १२ ॥
ईश्वरानुग्रहं तस्य श्रुत्वाऽपि मगधाधिपः ।
मानी शूरतया युक्तो न व्यरंसीद्रणोद्यमात् ॥ १३ ॥
आलोक्य मन्त्रिभिस्तेषां कलत्रैः सहितां प्रियाम् ।
विन्ध्यकान्तारसंकेतं निनायाप्तजनैर्नृपः ॥ १४ ॥
ततः ससैन्यो युद्धाय निरगात्सचिवान्वितः ।
रणोऽभून्मालवाधीशमगधाधीशयोर्महान् ॥ १५ ॥
मालवप्रेषिता शक्तिः मगधास्त्रैरलक्षिता ।
शूलिप्रभावतः सूतं छित्वा भूपममूर्छयत् ॥ १६ ॥
स्यन्दनो जवनैरश्वैः नीतो दूरं महत्तरम् ।
विन्ध्याद्रिविपिनोद्देशे ससंज घनशाखिनि ॥ १७ ॥
युधि सर्वबले क्षीणे कांदिशीकाश्च मन्त्रिणः ।

1 स्यार्थपतेः, S.    2 बहुरत्न. S.

अवशिष्टायुषो दिष्ट्या विविशुर्विन्ध्यकाननम् ॥ १८ ॥
पूर्वसंकेतमासाद्य सर्वे तेऽस्य पराजयम् ।
राज्यै विज्ञापयामासुर्नृपतेरप्यलक्ष्यताम् ॥ १९ ॥
मूर्छागतां च तां देवीं ते कथंचित्सुबोधिताम् ।
युक्तिभिः साहसोद्युक्तां परिवार्य न्यवर्तयन् ॥ २० ॥
तस्मिन्नेव निशीथे सा प्रसुप्ते सकले जने ।
प्राणत्यागाय निर्याता गुल्मौघान्तरिता सती ॥ २१ ॥
जन्मान्तरेऽपि मे भर्ता राजहंसो भवत्विति ।
पादपालम्बिलतिकापाशावृतगलाब्रवीत् ॥ २२ ॥
तत्क्षणे हिमशीतेन वातेन प्राप्तचेतनः ।
तच्छ्रुत्वा साहसं देवि मा कुर्वित्यभ्यधात्पतिः ॥ २३ ॥
तत्स्वरेण पतिं ज्ञात्वा विलोक्य स्यन्दने स्थितम् ।
सा दृष्ट्वा सचिवाञ्शीघ्रमाहूय तमदर्शयत् ॥ २४ ॥
स्वनिवासवनोद्देशं ते चानीय महीपतिम् ।
ततो मन्त्रौषधैः स्वस्थशरीरं तमकारयन् ॥ २५ ॥
अमात्यबोधनोद्धीतमनःक्षतिरसौ नृपः ।
जगाम वामदेवर्षेराश्रमं स्वजनैः सह ॥ २६ ॥
स तस्यानुग्रहं लब्ध्वा निवासांश्च तदाश्रमे ।
कल्पयित्वा दिनान्यत्र गमयामास कानिचित् ॥ २७ ॥
श्रीराजवाहनं राज्ञी सुषुवे खे च भारती ।
तदोवाचैष जित्वारीन्पालयिष्यति गामिति ॥ २८ ॥
आहूतो वामदेवर्षिस्तं दृष्ट्वा भाग्यवानयम् ।
इति तत्पूर्ववृत्तान्तं ज्ञापयामास पार्थिवम् ॥ २९ ॥
[illegible] ।

प्राग्बबन्ध मृणालेन द्विमुहूर्तं सरस्तटे ॥ ३० ॥
तदानीं स मुनिर्भूत्वा प्रियापार्श्वेऽन्यजन्मनि ।
द्विमासं शृङ्खलाबद्धो भूया इति शशाप तम् ॥ ३१ ॥
शापात्स एव ते देव्यां जातो निस्तीर्य चापदम् ।
शत्रून्विजित्य सर्वोर्वीपालकोऽयं भविष्यति ॥ ३२ ॥
पश्चाद्विद्याधराधीशो भवितेत्युक्तवान् ऋषिः ।
कृताशिषि मुनौ याते तथा सर्वे मुदं ययुः ॥ ३३ ॥
मित्रगुप्तः सुमित्रस्य प्रमतिः सुमतेः सुतः ।
मन्त्रगुप्तः सुमन्त्रस्य विश्रुतः सुश्रुतस्य च ॥ ३४ ॥
इत्येषां बालका जाताः रूपवन्तः सुतेजसः ।
सामाद्युपायाश्चत्वारो मूर्ता इव चकाशिरे ॥ ३५ ॥
अत्रान्तरे मुनिः कश्चित् समागत्य महीभुजे ।
समर्प्य बालकं कंचित् कथयामास तत्कथाम् ॥ ३६ ॥
सखा प्रहारवर्मा ते देव्याः पुंसवनादिकम् ।
द्रष्टुं सान्तःपुरं पुष्पपुरं प्रति समागमत् ॥ ३७ ॥
युधिप्रभावभग्नस्य तव दुर्लक्ष्यतां तथा ।
आकर्ण्य स्वपुरं भूयो निवृत्तो मैथिलः पथि ॥ ३८ ॥
किरातहृतसर्वस्वोऽथ भूत्तस्मिन् क्षणे वने ।
पुष्पार्थमेत्य तत्रैनमद्राक्षं गोमयावृतम् ॥ ३९ ॥
प्रहारवर्मणः पुत्रं गृहाणेति मुनौ गते ।
कृत्वा प्रहारवर्माख्यं तं देव्यै दत्तवान्पतिः ॥ ४० ॥
अन्यदा कोपि भिल्लेशो दर्शयन्कंचिदर्भकम् ।
प्रहारवर्मणः पुत्रस्त्वन्मित्रस्यैव निश्चयः ॥ ४१ ॥

वने केनापि भिल्लेन [1]दृष्टो नीतो मदन्तिकम् ॥ ४२ ॥
इत्युक्त्वा राजहंसाय तं ददौ स च भूपतिः ।
तस्योपहारवर्माख्यां चक्रे मित्रार्तिदुःखितः ॥ ४३ ॥
कदाचिदागतः कोऽपि राजहंसाय सन्मुनिः ।
कंचित्कुमारकं दत्वा तद्वृत्तान्तमभाषत ॥ ४४ ॥
आगच्छता मया [2]रामतीर्थाद्वर्त्मनि काचन ।
रुदती सार्भका दृष्टा पृष्टाचष्ट स्वचेष्टितम् ॥ ४५ ॥
मागधाधीश्वरामात्यपुत्रो रत्नोद्भवाभिधः ।
पोतेनार्थार्जकः कालयवनद्वीपमागमत् ॥ ४६ ॥
श्रेष्ठिनः कालगुप्तस्य सुवृत्तां तस्य कन्यकाम् ।
विवाह्य व्यवहारेण बह्वर्थं लब्धवानसौ ॥ ४७ ॥
तस्मिन्स्वपितरौ द्रष्टुं प्रत्यावृत्ते महार्णवे ।
पोते च विधिना भग्ने ययुः सर्वे विशीर्णताम् ॥ ४८ ॥
सुवृत्तां गर्भिणीं तस्य पत्नीमायुष्मतीं तदा ।
कथंचित्काष्ठमालम्ब्य भाग्येनाहमतारयम् ॥ ४९ ॥
मगधं तत्पतेर्जन्मदेशं प्रति शनैर्मया ।
नीयमानात्र विन्ध्याद्रिवने सुतमसूत सा ॥ ५० ॥
प्रसवव्यथया तत्र गुल्मैर्लुण्ठत्यचेतना ।
ततोऽहं बालमादाय विचेतुं मार्गमागमत् ॥ ५१ ॥
अहं तद्धात्रिकास्मीति ब्रुवाणैवागते गजे ।
अधावद्बालकं त्यक्त्वा गूढोऽहं चाभवं तदा ॥ ५२ ॥
एवं बालकमादाय करेणोर्ध्वं व्यचिक्षिपत् ।
तत्क्षणानुगतं सिंहं दृष्ट्वा वन्यगजोऽव्रजत् ॥ ५३ ॥

[1] दृष्टा. S. [2] गच्छन् तत्र वर्त्मनि. S.

पतन्तं गगनाद्बालं तरुशाखास्थितः कपिः ।
गृहीत्वा स्कन्धशाखासु फलेतरतया त्यजत् ॥ ५४ ॥
तमेनमहमादाय सान्द्रपल्लवसंस्तरे ।
नियोगाद्वामदेवर्षेरनैषं भवदन्तिकम् ॥ ५५ ॥
इत्याख्याय मुनौ याते राजा रत्नोद्भवं प्रति ।
शोचन् शुभेऽह्नि तं बालं चक्रे पुष्पोद्भवाह्वयम् ॥ ५६ ॥
वामदेवमुनेः शिष्यः सोमशर्मा कदाचन ।
व्याहरत्पुरतो राज्ञः कमप्यारोप्य बालकम् ॥ ५७ ॥
कावेरीतीरगुल्मेषु रुदती बालकान्विता ।
अभ्यभाषत पृष्टैका 'सेतोराव्रजता मया ॥ ५८ ॥
मगधेशप्रधानस्य नंदनो मतिशर्मणः ।
देशं प्रापदमुं सत्यशर्माख्यस्तीर्थयात्रया ॥ ५९ ॥
समानकुलजां कन्यामाजहार स कुत्रचित् ।
कालीं नामोपयम्यापि तदनुत्पन्नसन्ततिः ॥ ६० ॥
गौरीं नाम पुनस्तस्याः परिणीय सहोदरीम् ।
तस्यामजीजनत्पुत्रमेनमस्यास्मि धात्रिका ॥ ६१ ॥
स्नानार्थमागता काली बालेन सह निर्जने ।
प्रवाहे पातयित्वा मामपासरदसूयिनी ॥ ६२ ॥
पाथस्य मग्नमेवैन नयन्ती बालकं क्वचित् ।
उडुपं प्राप्य दष्टाहमभवं तत्र भोगिना ॥ ६३ ॥
आयुः शेषतया कृच्छ्राद्बालं तीरमजीगमम् ।
इत्युक्त्वा सा सलीलास्यविषेण विवशाभवत् ॥ ६४ ॥
अनुत्क्रान्तविषा मन्त्रैः साभूदुत्क्रान्तजीविता ।

तदुपाख्यानविज्ञोऽहमुपानैषमिमं सुतम्[1] ॥ ६५ ॥
मद्गुरोराज्ञया तुभ्यं दत्तोऽयमिति सोऽप्यगात् ।
तस्यापि सोमदत्ताख्यां विदधे वसुधाधिपः ॥ ६६ ॥
अन्येद्युर्दिवसारम्भे देवी वसुमती विभोः ।
अग्रे कुमारकं कंचित् संनिधाय व्यजिज्ञपत् ॥ ६७ ॥
अस्यामेव तमस्विन्यां कान्ता काचिन्ममाग्रतः ।
आविर्भूय प्रदर्श्यैनमवादीदद्भुतां कथाम् ॥ ६८ ॥
माणिभद्रस्य यक्षस्य पुत्री तारावलीत्यहम् ।
आत्मजो धर्मपालस्य कामपालः पतिर्मम ॥ ६९ ॥
तस्य सूनुरयं बालः कुबेरादेशतो मया ।
राजवाहनसेवार्थं निहितोऽत्रेति सावदत् ॥ ७० ॥
आख्याय कामपालस्य वृत्तान्तं पूर्वजन्मसु ।
[2]अभूदन्तर्हिता भर्तुरन्तिकं गन्तुकाम्यया ॥ ७१ ॥
इत्थं देव्याः वचः श्रुत्वा राजहंसो महीपतिः ।
तस्यार्थपाल इत्याख्यां विदधे विधिपूर्वकम् ॥ ७२ ॥
संवर्धितं वसुमतीमहिषीप्रयत्नैः
तद्राजवाहनकुमारकपूर्वमीड्यम् ।
राजा कुमारदशकं कथिताद्यमुक्त-
नागोपनीतमिति यौवनमभ्यनन्दत् ॥ ७३ ॥

इति श्रीमदप्पयामात्यविरचिते दशकुमारचरितकथासारे
कथाप्रारम्भो नाम प्रथमः परिच्छेदः

---

[1] शिशुम्, S.
[2] अन्तर्भूताहि सा, S.

## द्वितीयः परिच्छेदः

अथैकदा कुमारैस्तैः स च धात्रीशशेखरः ।
वामदेवमठं गत्वा मुनीन्द्रं प्रणनाम तम् ॥ १ ॥
आदरेणोपवेश्यैतान् स मुनिः प्राह पार्थिवम् ।
राजवाहनदेवोऽयं विद्विषः साधयिष्यति ॥ २ ॥
अवन्तिसुन्दरीं नाम मानसारस्य कन्यकाम् ।
स्वेनैव भुजवीर्येण संप्राप्तां परिणेष्यति ॥ ३ ॥
ततो दिग्विजयायैषः ससखः प्रेष्यतामिति ।
मुनिवाक्यात् सुहृद्भिस्तं दिग्जयार्थे न्ययुङ्क्त सः ॥ ४ ॥
ततः पितृसमादिष्टः सहायसहितो महान् ।
मुनिवाक्यस्य विश्वासात् प्रस्थितो दिग्जिगीषया ॥ ५ ॥
गत्वातिदूरमध्वानं कचिद्विन्ध्याद्रिकन्दरे ।
स्फाटिकं देवतागारमद्राक्षीद्राजवाहनः ॥ ६ ॥
तत्र मुक्तामयं लिङ्गं प्रणम्यानन्तरं द्विजम् ।
द्वारदेशस्थितं कंचित् क्रूराकारं ददर्श च ॥ ७ ॥
पृष्टः कुमारकेणाह ब्राह्मणश्च स्वचेष्टितम् ।
पुराहं शबरैः सार्धमाबद्धं चौर्यकर्मणा ॥ ८ ॥
कदाचित्पथिकं कंचित् ब्राह्मणं हन्तुमुद्यतान् ।
स्वजातिपक्षपातेन किरातौघान्न्यवारयम्[1] ॥ ९ ॥

[1] तान् प्रत्यवारयम् . S.

विवदन्तो मया क्रुद्धास्ते सर्वे मामताडयन् ।
व्यथयाहं गतप्राणो यमावासमयासिषम् ॥ १० ॥
नरको न प्रवेष्टव्यः त्वया विप्रोपकारिणा ।
आयुःशेषोऽस्ति ते चौर्यं न कर्तव्यमतः परम् ॥ ११ ॥
इत्युक्तः चित्रगुप्तेन प्राप्तोऽहं पूर्वविग्रहम् ।
महात्मानुग्रहं लब्ध्वा चराम्यत्र ततः परम् ॥ १२ ॥
इति व्याहृत्य तं भूयोऽप्यपसार्य मिथोऽभ्यधात् ।
महानुभावं निश्चित्य त्वां कमप्यर्थमर्थये ॥ १३ ॥
पृष्ठतो लिङ्गपीठस्य बिलद्वारेण निर्गता ।
लिङ्गं प्रतिनिशीथं काप्यबला पूजयत्यदः ॥ १४ ॥
दूरस्थ एव वीक्ष्यैतामुपसर्तुं बिभेम्यहम् ।
सा चापाङ्गपृषत्केन भिनत्ति हृदयं मम ॥ १५ ॥
सङ्गीतानन्तरं भूयो विशत्यत्रैव सा बिले ।
साधयित्वार्थिने देव मह्यं तां दातुमर्हसि ॥ १६ ॥
इत्युक्तस्तेन तत्कार्यं सोऽनुमत्य ततो रवौ ।
अदृश्ये निशि तत्रैव सुष्वाप सखिभिः सह ॥ १७ ॥
निशीथे लिङ्गपूजार्थमागतां तां विलासिनीम् ।
कुमारं बोधयित्वासौ दर्शयामास भूसुरः ॥ १८ ॥
विघ्नः कार्यस्य मास्त्वेवं सुहृदस्तानबोधयन् ।
शनैरुत्थाय तां कन्यामुपसृत्य जगाद सः ॥ १९ ॥
निशीथे कुत आयाता सुभ्रू ब्रूहीति भाषिता ।
अदत्तप्रतिभाषैव कृतेशार्चाविशद्बिलम् ॥ २० ॥
अगाद्द्विजोपकारार्थमनेन बिलवर्त्मना ।
दुःखयन्तु न मित्राणि द्रागायास्याम्यहं पुनः ॥ २१ ॥

इति तत्र बिलद्वारे विलिख्य नृपनन्दनः ।
तं महीसुरमादाय तां कन्यामन्वगव्रजत्[1] ॥ २२ ॥
सा च पातालमभ्येत्य पुरं कंचन निर्जनम् ।
प्राप्ता हर्म्यतले स्थित्वा बभाषे राजवाहनम् ॥ २३ ॥
नमुचेर्दानवेन्द्रस्य तनयाहं पिता च मे ।
विष्णुना निहतो युद्धे वैकुण्ठं सजनोऽव्रजत् ॥ २४ ॥
एतच्चारुपुरं देव पुमान्कः पालयेदिति ।
[2]व्यजिज्ञपन्मुकुन्दाय स चाज्ञापयति स्म माम् ॥ २५ ॥
भविष्यति पतिर्यस्ते स पुरं पालयिष्यति ।
तावद्विन्ध्यबिलद्वारि लिङ्गमाराधयेरिति ॥ २६ ॥
विष्ण्वाज्ञया तदारभ्य वसाम्यत्रैव पत्तने ।
नक्तं नक्तमदः[3] सिद्धलिङ्गमभ्यर्चयाम्यहम् ॥ २७ ॥
यः पुमान् संविशेदेतत्कुण्डं[4] मे स पतिर्भवेत् ।
इत्युक्त्वा सा ज्वलज्ज्वालवह्निकुण्डमदर्शयत्[5] ॥ २८ ॥
ततस्तस्या वचः श्रुत्वा क्षिप्रं विप्रोऽनलेऽविशत्[6] ।
क्षणेनैव युवा भूत्वा स विप्रो निरगात्पुनः ॥ २९ ॥
पाणिमग्राहयत्तस्यास्तं द्विजं राजवाहनः ।
ततस्तत्सर्वसस्याढ्यं प्रजाकीर्णमभूत्पुरम् ॥ ३० ॥
केषुचित् वासरेष्वत्र गतेषु गमनैषिणः[7] ।
मणिं कंचित् प्रदर्श्याथ जगाद कमलावती ॥ ३१ ॥

1 अनुवव्रजे, S.
2 व्यजिज्ञपं, S.
3 अतः, S.
4 प्रविशेदेतत्, S.
5 ज्वलज्ज्वालमग्निकुण्डम्, S.
6 अपतत्, S.
7 गतेष्वत्र गमनैषिणं, S.

एतद्रत्नं दधानस्य न सन्ति क्षुत्तृषामयाः ।
शस्त्राग्निग्रहचोराहिसिंहादिभ्यो भयान्यपि ॥ ३२ ॥
इति स्तुत्वा मणिं तस्मै प्रार्थनापूर्वकं ददौ ।
तामापृच्छ्य निरक्रामत्स च तेन बिलाध्वना ॥ ३३ ॥
अनवेक्ष्य सर्वांस्तत्र तदन्वेषी महीमटन् ।
प्रापदुज्जयिनीदेशं मालवं राजवाहनः ॥ ३४ ॥
तस्या उपवनोद्देशे पादपाधः प्रतीक्षिणम् ।
दृष्ट्वा पुष्पोद्भवं प्रीत्या परिरेभे ततोत्थितम् ॥ ३५ ॥
आवेदितात्मवृत्ताय तस्मै पुष्पोद्भवस्तदा ।
तत्पृष्टः प्राञ्जलिर्भूत्वा स्ववृत्तान्तं न्यवेदयत् ॥ ३६ ॥
देव द्विजोपकाराय सुरालयबिलं त्वयि ।
तदा प्रविष्टे मित्रौघे त्वदन्वेषणतत्परे[1] ॥ ३७ ॥
अहं च भवदन्वेषी भूत्वा विन्ध्यवने भ्रमन् ।
मध्याह्ने ग्रीष्मतप्तो हि वटच्छायामुपासरम् ॥ ३८ ॥
तस्मिन्नेव क्षणे तस्मात् पुरुषं गिरिशृङ्गतः ।
पतन्तं कंचिदालोक्य दोर्भ्यामलम्भिषि द्रुतम् ॥ ३९ ॥
मूर्च्छितं दूरपातेन कथंचिद्बोधितं मया ।
भृगुपातमहो निन्द्यमकार्षीरित्युपालभे ॥ ४० ॥
सोऽप्यवादीदहं राजहंसामात्यतनूद्भवः ।
रत्नोद्भवोऽस्मि मत्पोतो ममज्ज जलधौ पुरा ॥ ४१ ॥
कंचित्फलकमादाय तामार्तिमतरं तथा ।
तत्रस्था गर्भिणी भार्या क्व गता मे न लक्षिता ॥ ४२ ॥

[1] This verse missing in S.

मालवाधीशसंग्रामे मगधेशपलायनम् ।
मद्गुरोरपि संन्यासं श्रुत्वा शोकार्णवेऽविशम् ॥ ४३ ॥
षोडशाब्दावसाने तु प्रियां संप्राप्स्यसीति माम् ।
कश्चिदाश्वासयत्सिद्धः षोडशाब्दाश्च ते गताः ॥ ४४ ॥
प्रियाविरहसन्तापमसहिष्णुरतः परम् ।
भृगुपातमकार्षं मां पतन्तं[1] तु त्वमग्रहीः ॥ ४५ ॥
इत्याकर्ण्य स्मृतोदन्तस्तं मे तातमवागमम् ।
अत्रान्तरे श्रुतं पार्श्वे कस्याश्चित् क्रन्दितं स्त्रियः ॥ ४६ ॥
आगच्छन्त्यश्रुणा वृद्धा दावाग्निस्तनयां मम ।
आवृणोति भयादस्मादेनां रक्षेत्यवोचत ॥ ४७ ॥
अहं च तूर्णमग्नेस्तामपनीय तदन्तिकम् ।
आनीय सा च वृद्धा मे पृष्टा ब्रूत स्वमादरम्[2] ॥ ४८ ॥
मगधाधीश्वरामात्यपुत्रो रत्नोद्भवाभिधः ।
पोतेनार्थार्जकः कालयवनद्वीपमागमत् ॥ ४९ ॥
श्रेष्ठिनः कालगुप्तस्य सुवृत्तां तत्र कन्यकाम् ।
विवाह्य व्यवहारेण बह्वर्थं लब्धवानसौ ॥ ५० ॥
द्रष्टुं स्वपितरौ तस्मिन्प्रत्यावृत्ते महार्णवे ।
पोते च विधिना भग्ने ययुः सर्वे विशीर्णताम् ॥ ५१ ॥
सुवृत्तां गर्भिणीं तस्य पत्नीमायुष्मतीं तदा ।
कथंचित् काष्ठमालम्ब्य भाग्येनाहमतारयम् ॥ ५२ ॥
मागधं तत्पतेर्जन्मदेशं प्रति शनैर्मया ।
नीयमानात्र विन्ध्याद्रिवने सुतमसूत सा ॥ ५३ ॥

[1] अहं तत्राकार्षं मां, S. [2] ब्रूते स्वयं ततः, S

प्रसवव्यथया तस्यां लुठन्त्यामहमग्रजम् ।
इतस्ततस्तमादाय बालं मार्गप्रतीक्षिणी ॥ ५४ ॥
तदानीमेव वन्येभे ममाभ्यर्णमुपागते ।
अधावं सूतिकागुल्मं बालं त्यक्त्वा भयादहम् ॥ ५५ ॥
गजे याते पुनश्चावामन्विष्यापि तमर्भकम् ।
नापश्याव मुनेः कस्याप्यागच्छावाश्रमं शनैः ॥ ५६ ॥
अन्ते षोडशवर्षाणां पतिं पुत्रं त्वमाप्स्यसि ।
इत्यादेशं स चाख्याय तां समाश्वासयन्मुनिः ॥ ५७ ॥
तत्कालातिक्रमे वह्निं [1]विशन्ती रक्षिता त्वया ।
सुवृत्ता नाम सैवेयमहमस्याश्च धात्रिका ॥ ५८ ॥
इत्थं निशम्य सा मातेत्यज्ञायत मया हृदि ।
मामनुप्राप्य सोऽद्राक्षीत् स्त्रियं रत्नोद्भवोऽपि ताम् ॥ ५९ ॥
जातौ परस्परौ ज्ञातौ पितरौ संभ्रमाकुलौ ।
मां निवेदितमद्वृत्तं प्रणतं चाभ्यनन्दताम् ॥ ६० ॥
अक्ष्णोरञ्जनमाधाय[2] साधयित्वा महद्धनम् ।
पुरेऽस्मिन्व्यवहारेण वर्तेऽहं पितृपोषकः ॥ ६१ ॥
विदेशव्यवहारीति मां लसद्वस्तुसंपदम् ।
राजप्रकृतयः सर्वा मानयन्ति प्रयत्नतः ॥ ६२ ॥
धात्रीसुता राजपुत्र्याः सखी या बालचन्द्रिका ।
मयि स्निह्यति सा तस्यामहं चानुदिनं रमे ॥ ६३ ॥
कदाचिदनुजो राजमन्त्रिणश्चण्डवर्मणः ।
दारुवर्मा बलादेनामानयत्स्वगृहं निशि ॥ ६४ ॥

[1] This word missing in A. [2] आदाय, S.

निजस्वरूपमाच्छाद्य दासीचिह्नानि धारयन् ।
तथैव प्रियया सार्धमगच्छं तस्य मन्दिरम् ॥ ६५ ॥
तं तदालिङ्गनोद्युक्तमहमेकान्तसद्मनि ।
ब्रह्मराक्षसलक्षेण[1] कण्ठे गृण्हन्नमारयम् ॥ ६६ ॥
ततो निष्कण्टकं तस्यां यथाभिलषितान्यलम्[2] ।
सुखान्यनुभवन्प्रीत्या दिनानि गमयाम्यहम् ॥ ६७ ॥
त्वद्दर्शननिमित्तार्थं परीक्ष्ये पक्षिणं तरौ ।
भवन्तं चाहमद्राक्षं फलिता मे मनोरथाः[3] ॥ ६८ ॥
श्रुत्वेति पुष्पोद्भवभाषितानि
वसन्कुमारो गृह एव तस्य ।
तस्मिन्पुरे विप्रमिषाच्चचार
मन्त्रौषधप्रश्नकलां वितन्वन् ॥ ६९ ॥

इति श्रीमदप्पयामात्यविरचिते दशकुमारकथासारे पुष्पोद्भवकथा नाम द्वितीयः परिच्छेदः ॥

---

[1] रूपेण, S.
[2] अभिलषितं फलं, S.
[3] फलितो मे मनोरथः, S.

## तृतीयः परिच्छेदः

अन्यदा मालवेन्द्रस्य तनयां राजवाहनः ।
यात्रोत्सवे महाकाल्या ददर्शावन्तिसुन्दरीम् ॥ १ ॥
अपाङ्गचलया दृष्ट्या सापि तं निरवर्णयत् ।
तयोरुपर्यनङ्गश्च ववर्ष कुसुमाशुगान् ॥ २ ॥
सखि जानासि किं कोऽयमित्युक्त्वा बालचन्द्रिका ।
तस्य नामादिकं तस्यै कर्णमूले न्यवेदयत् ॥ ३ ॥
राजवाहनसंसक्तहृदया राजपुत्रिका ।
प्राप्ता गर्भगृहं काल्या इमामार्यामवोचत ॥ ४ ॥[1]
राजार्धरचितमौले[2] त्वत्पदराजीवसेवया मह्यम् ।
[3]राजितसुगुणं रमणं राजसमं[4] राजवाहनं देहि ॥ ५ ॥
इति देवीं नमस्कृत्य निर्गता सा कुमारिका ।
विलासिनीसहस्रौघैर्वृता कन्यापुरं ययौ ॥ ६ ॥
नत्वा देवीं स निर्गच्छन्निध्याय जनसंकुले ।
सोमदत्तमथोत्थाप्य प्रणतं परिषस्वजे ॥ ७ ॥
आलिलिङ्गतुरन्योन्यं स च पुष्पोद्भवोऽप्युभौ ।
उपह्वरस्थले क्वापि ते [5]चोपविविशुस्त्रयः ॥ ८ ॥

[1] This verse missing in S. [2] This word not found in S.
[3] राजानं, S. [4] तरुणं रमणं तं, S. [5] तत्रोपविविशुः, S.

कथां पुष्पोद्भवस्यापि स्वस्य चोक्त्वा नृपात्मजः ।
पप्रच्छ सोमदत्तं च सोऽप्यूचे वृत्तमात्मनः ॥ ९ ॥
देव द्विजोपकाराय सुरालयबिलं त्वयि ।
तदा प्रविष्टे मित्रौघे त्वदन्वेषणतत्परे ॥ १० ॥
अहं च त्वां समन्वेक्षं नदीमुत्तीर्य नर्मदाम् ।
गच्छन् क्वापि स्फुरद्रत्नं किमप्यद्राक्षमध्वनि ॥ ११ ॥
तदादाय वने भूयो व्रजन्मध्यन्दिने सति ।
आतपोद्वेजितो देव गृहे क्वचिदुपाविशम् ॥ १२ ॥
अथ कोऽप्यागतो विप्रः श्रोत्रियो मामयाचत ।
अकिञ्चनाय यत्किञ्चिद्देहि क्षुत्पीडिताय मे ॥ १३ ॥
इत्थमर्थयमानाय तद्रत्नमददामहम् ।
तत्समादाय बहुधा दत्ताशीर्ब्राह्मणोऽव्रजन् ॥ १४ ॥
गते मुहूर्ते बद्धः सन् स एवानीय कांश्चन ।
तत्रस्थमेव मां सोऽपि किंकराणामदर्शयत् ॥ १५ ॥
प्रत्यग्रहिषमेतेन वितीर्णं रत्नमन्यथा ।
नापराद्धं मया किंचिदित्यवादीच्च स द्विजः ॥ १६ ॥
ततः क्रूराश्च ते विप्रं मुक्त्वा मां मणिना सह ।
हृतं दर्शय वित्तं चेत्यब्रुवंस्तानथाभ्यधाम् ॥ १७ ॥
राजवाहनभृत्योऽहं तमन्वेष्टुमितस्ततः ।
भ्रमन् पथि तदद्राक्षं रत्नं नो वेद्म्यनन्तरम्[1] ॥ १८ ॥
तच्चास्मै याचमानाय ब्राह्मणाय समर्पितम् ।
इत्युक्ताः कुपितास्ते मां नीत्वा कारागृहेऽक्षिपन् ॥ १९ ॥
यूयं शृङ्खलिताः केन हेतुनेति मया भटाः[2] ।

तत्र कारागृहे पृष्टाः तेऽप्यवोचन् सशृङ्खलाः ॥ २० ॥
लाटेशो मत्तकालोऽस्मत्स्वामिना वीरकेतुना ।
विगृह्णन्सेनयाभ्येत्य पाटलीपुरमावृणोत् ॥ २१ ॥
वीरकेतुर्भिया तस्य स्वकन्यां वामलोचनाम् ।
मन्त्रिणं मानपालं च ससैन्यमुपधां व्यधात् ॥ २२ ॥
आदायोपायनं[1] सर्वं वीरकेतुसमर्पितम् ।
जयी स्वपुरमुद्दिश्य मत्तकालो न्यवर्तत ॥ २३ ॥
सुलग्ने परिणेष्यामीत्यालोच्य पथि तां वधूम् ।
पृथङ्निवेशयन्नेष मत्तकालः सुरक्षिताम् ॥ २४ ॥
गच्छन्विन्ध्यवनप्रान्ते पञ्चकेषु दिनेष्वपि ।
मत्तकालः प्रमत्तः सन् मृगयार्थं भ्रमत्यसौ[2] ॥ २५ ॥
वयं निर्यातयिष्यामः स्वामिनो नः पराजयम् ।
इति संमन्त्र्य ते सर्वे[3] निहन्तुं समुपागताः ॥ २६ ॥
सुरङ्गया वयं यावत्प्राप्तास्तच्छयनं निशि ।
तावदेव मृगव्याय मत्तकालो विनिर्गतः ॥ २७ ॥
वयं चादाय तच्छय्यां निवासे भूषणावलिम् ।
निर्गताः सत्वरं दुर्गं व्यगाहिष्महि दुर्गमम् ॥ २८ ॥
अनुधावन्त एवास्य भटौघा अवरुध्य नः ।
अग्रहीषुर्विभूषाणां जालं हस्तगतं क्षणात् ॥ २९ ॥
रत्नं महार्हमस्यैकं नास्तीत्यस्मान्सुशृङ्खलान् ।
आकर्षुस्ते वयं तच्च न विद्म पतितं क्व च[4] ॥ ३० ॥
तच्च रत्नं गृहीत्वैतान् चोरान् मारयतेत्ययम् ।

[1] उपायतः, S. [2] भ्रमत्ययं, S.
[3] सर्वं, S. [4] क्वा, S.

राजाथाज्ञाकरान्पार्श्वचरानाज्ञापयत्किल ॥ ३१ ॥
इत्याकर्ण्य निशीथेऽहं[1] मम तेषां च शृङ्खलाः ।
विभज्य तैश्च नीतः सन् मानपालमुपासरम् ॥ ३२ ॥
मानपालो निरीक्ष्यैव मां भटैस्तैः प्रदर्शितम् ।
शौर्यसत्वाधिकं[2] ज्ञात्वा सादरं समुपाचरत् ॥ ३३ ॥
प्रत्यूषे मत्तकालेन प्रेषिताः किंकरा द्रुतम् ।
मानपालं समासाद्य भर्तुः सन्देशमब्रुवन् ॥ ३४ ॥
विभज्य शृङ्खलां चोरा भवदन्तिकमागमन् ।
ततश्च बन्धनं तांश्च प्रत्यर्पयितुमर्हसि ॥ ३५ ॥
तच्छ्रुत्वा मानपालश्च क्व नु तिष्ठन्ति चोरकाः ।
इत्युक्त्वा तान्भटान्क्रुद्धः किंकरान्निरवासयत् ॥ ३६ ॥
ततः शीघ्रेण सैन्यं च स सन्नद्धमकारयत् ।
मत्तकालश्च तच्छ्रुत्वा स्वसैन्यं समनाहयत् ॥ ३७ ॥
मानपालस्तदा मह्यं[3] बहुमानपुरःसरम् ।
अदात्तुरङ्गमातङ्गयुक्तं सैन्यं च किंचन ॥ ३८ ॥
ततस्तयोर्द्वयोर्घोरे प्रवृत्ते सति सङ्गरे ।
अभ्यधावं हयारूढो मत्तकालरथं प्रति[4] ॥ ३९ ॥
ममोपरि प्रयुक्ताश्चे तस्मिन्नपसरन्नहम् ।
खड्गेनोपसरंस्तूर्णं तस्य शीर्षमपातयम् ॥ ४० ॥
तस्मिन्निपतिते सर्वे धावन्ति स्म तथाकुलाः ।
प्रत्यग्रहीत् स तत्राजौ मानपालो जयश्रियम् ॥ ४१ ॥

1 हि, S. 2 शौर्यं च मामकं, S.
3 तदामात्यः, S.
4 Reading in S. goes against the original story.

संदेशहारिभिस्तेन प्रेषितैरतिसत्वरैः ।
विज्ञापितजयोदन्तो वीरकेतुः समागमत् ॥ ४२ ॥
जयलक्ष्मीनिधानं[1] मे मानपालः पराक्रमम् ।
विज्ञाप्य हर्षपूर्णोऽयं[2] स्वामिने मामदर्शयत् ॥ ४३ ॥
आलिङ्ग्य वीरकेतुर्मामसकृन्मम विक्रमम् ।
अभिनन्द्यादिशन्मह्यं तनयां वामलोचनाम् ॥ ४४ ॥
तस्याः पाणिं गृहीत्वा च रथमारुह्य भास्वरम् ।
श्वशुरेणैव नीतोऽहमविशं पाटलीपुरम् ॥ ४५ ॥
यौवराज्यपदं प्राप्य वामलोचनया सह ।
अन्वभूवं यथेष्टानि विविधानि सुखान्यहम् ॥ ४६ ॥
भविता[3] षोडशाब्दान्ते भवद्दर्शनसंमदः[4] ।
इति सिद्धवरादेशं स्मरन्कालमजीगमम् ॥ ४७ ॥
द्रष्टुमस्या महाकाल्या ह्यमद्य महोत्सवम् ।
आगच्छत्सु महीपालेष्वहं चास्मि समागतः ॥ ४८ ॥
अदर्शि पुण्यपाकेन त्वत्पदाब्जयुगं मया ।
श्रुत्वेति राजपुत्रोऽस्य [5]शूरतामन्वमोदत ॥ ४९ ॥
यदा मे प्रस्तुतं कार्यं तदैवागम्यतां त्वया ।
इत्याज्ञाप्य चमूयुक्तं तं विभुर्विससर्ज च ॥ ५० ॥
ततः पुरं सोमदत्ते प्रयाते राजवाहनः ।
पुष्पोद्भवसनाथः सन् प्रययौ तस्य मन्दिरम् ॥ ५१ ॥
अवन्तिसुन्दरीं ध्यायन् सोऽभून्मन्मथपीडितः ।

[1] निदानं, S. [2] हर्षपूर्णाय, S.
[3] श्वः, S. [4] संपदः, S.
[5] सुतरां, S.

तदासक्तमना सापि संतप्तहृदयाभवत् ॥ ५२ ॥
तस्मै संभाषणं तस्यास्तस्यै तस्याभिभाषणम् ।
ज्ञापयन्ती द्वयोः प्रेम व्यतनोद्बालचन्द्रिका ॥ ५३ ॥
कदाचिन्मालवेन्द्रस्य पुरस्तादैन्द्रजालिकः ।
कश्चित्प्रतिदधे मायां जलदागममण्डिताम्[1] ॥ ५४ ॥
तत्र मायाघनध्वान्ते कुमारः कन्यकापुरम् ।
बालचन्द्रिकया पूर्वं सूचिताध्वो विवेश सः ॥ ५५ ॥
रम्यकान्ते गृहे[2] सार्धं प्रियया राजवाहनः ।
विहरन् गमयामास दिनानि कतिचित् पुनः ॥ ५६ ॥
अथैकदा वल्लभया सुगोष्ठ्यामभ्यर्थनापूर्वकमेष पृष्टः ।
चतुर्दशानां जगतां प्रपञ्चं संक्षेपतः स्पष्टमुदाजहार ॥ ५७ ॥

इति श्रीमदप्पयामात्यविरचिते दशकुमारकथासारे सोमदत्तकथाकथनं नाम तृतीयः परिच्छेदः ॥

---

[1] अद्भुतं, S.

[2] रम्यैकान्तगृहे, S.